भिदुरम् ४ पविः ५ शतकोटिः ६ स्वरुः ७ शम्बः ८ दम्भोलिः ९ अशनिः १० । इत्यमरः । १।१।५० ॥ कुलीशम् ११ भिदिरम् १२ भिदुः १३ स्वरुस् १४ सम्बः १५ संवः १६ अशनी १७ वज्राशनिः १८ । इति तट्टीका ॥ जम्भारिः १९ त्रिदशायुधम् २० शतधारम् २१ शतारम् २२ आपोत्रम् २३ अब्जम् २४ । इति पुरुषोत्तमः ॥ गिरिकण्टकः २५ गौः २६ अभ्रोत्थम् २७ मेघभूतिः २८ गिरिज्वरः २९ । इति शब्दरत्नावली ॥ जाम्बविः ३० दम्भः ३१ । इति जटाधरः ॥ भिद्रः ३२ अम्बुजम् ३३ । इति त्रिकाण्डशेषः ॥ ( यथा, ऋग्वेदे ।१।३२।२।

"अहन्नहिं पर्व्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्य्यं ततक्ष ॥")

अस्योत्पत्तिर्यथा,—

"तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरम् ।
पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत् ॥
त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम् ।
दैत्यदानवसंहर्त्तुः सहस्रकिरणात्मकम् ॥
रूपञ्च प्रतिमञ्चक्रे त्वष्टा पादादृते महत् ।
न शशाकाथ तद्द्रष्टुं पादरूपं रवेः पुनः ॥
अर्च्चास्वपि ततः पादौ न कश्चित् कारयेत् क्वचित् ।
यः करोति स पापिष्ठां गतिमाप्नोति निन्दिताम् ॥
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दुःखसंयुतम् ।
तस्मान्न धर्म्मकामार्थी चित्रेष्वायतनेषु च ।
न क्वचित् कारयेत् पादौ देवदेवस्य धीमतः ॥"
इति मात्स्ये ११ अध्यायः ॥ * ॥

अपि च ।

"प्रविश्य जठरं शुक्रो दैत्यमातुः पुरन्दरः ।
ददर्शोर्द्ध्वमुखं बालं कटिन्यस्तकरं महत् ॥
तस्यैवान्तेऽथ ददृशे पेशीं मांसस्य वासवः ।
शुद्धस्फटिकसंकाशां कराभ्यां जगृहेऽथ ताम् ॥
ततः कोपसमाध्मातो मांसपेशीं शतक्रतुः ।
कराभ्याममर्द्दयामास ततः सा कठिनाभवत् ॥
ऊर्द्ध्वगार्द्धञ्च ववृधे त्वधोऽर्द्धं ववृधे तथा ।
शतपर्व्वा च कुलिशः संजातो मांसपेशितः ॥"
इति वामने ६८ अध्यायः ॥ * ॥

वृत्रासुरवधार्थं दधीचिमुनेरस्थ्ना इन्द्राज्ञया विश्वकर्म्मणा निर्म्मितवज्रस्य प्रमाणं यथा,—

"एवं कृतव्यवसितो दध्यङाथर्व्वणस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं सन्नयन् जहौ ॥
यताक्षासुमनोबुद्धिस्तत्त्वदृक् ध्वस्तबन्धनः ।
आस्थितः परमं योगं न देहं बुबुधे गतम् ॥
अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा ।
मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥
वृतो देवगणैः सर्व्वैर्गजेन्द्रोपर्य्यशोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥"
इति श्रीभागवते ६ स्कन्धे १० अध्यायः ॥ * ॥

तन्निर्घोषवारकविधिर्यथा,—

"प्रचण्डपवनाघाते मेघेषु स्तनितेषु यः ।
त्रिः पठेज्जैमिनीयोऽस्मि प्राङ्मुखो वाण्डुदङ्मुखः ॥
तस्य माभूद्भयं घोरं विद्युतीयोऽवसीदति ॥"
इत्याह्निकतत्त्वधृतब्रह्मपुराणम् ॥

"मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् ।
विद्युदग्निभयं नास्ति पठिते च गृहोदरे ॥"
लिखिते च गृहोदरे । इति वा पाठः ।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"
इति पुराणम् ॥ * ॥ * ॥

रत्नविशेषः । हीरा इति भाषा । तत्पर्य्यायः । इन्द्रायुधम् २ हीरम् ३ भिदुरम् ४ कुलिशम् ५ पविः ६ अभेद्यम् ७ अशिरम् ८ रत्नम् ९ दृढ़म् १० भार्गवकम् ११ षट्कोणम् १२ बहुधारम् १३ शतकोटिः १४ । अस्य गुणाः । षड्रसोपेतत्वम् । सर्व्वरोगापहारकत्वम् । सर्व्वाघशमनत्वम् । सौख्यत्वम् । देहदार्ढ्यकरत्वम् । रसायनत्वञ्च । तद्विशेषो यथा,—

"स्वच्छं विद्युत्प्रभं स्निग्धं सौन्दर्य्यं लघु लेखनम् ।
षडारञ्चोच्चधारञ्च शुभाम्यारं श्रियं दिशेत् ॥"

तस्य कुलक्षणं यथा,—

"भस्माभं काकपादञ्च रेखाक्रान्तन्तु वर्त्तुलम् ।
आधारमलिनं बिन्दुसंत्रासि स्फुटितन्तथा ।
नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत् ॥"

वज्रस्य चतुर्व्वर्णलक्षणं यथा,—

"श्वेतालोहितपीतमेचकतया छायाश्चतस्रः क्रमाद्-
विप्रादित्वमिहास्य यत् सुमनसः शंसन्ति सत्त्वं ततः ।
स्फीतां कीर्त्तिमनुत्तमां श्रियमिदं दत्ते यथा संभृतं
मर्त्यानामयथायथं तु कुलिशं पथ्यं हितं जात्यतः ॥" * ॥

तस्य परीक्षा यथा,—

"यत् पाषाणतले निकाशनिकरे नोद्घृष्यते निष्ठुरे
यच्चान्योपललोहमुद्गरमुखैर्लेखान्न यात्याहनम् ।
यच्चान्यं निजलीलयैव दलयेद्वज्रेण वा भिद्यते
तज्जातं कुलिशं वदन्ति कुशलाः श्लाघ्यं महार्घञ्च तत् ॥" * ॥

तस्य वर्णगुणौ यथा,—

"विप्रः सोऽपि रसायनेषु बलवानष्टाङ्गसिद्धिप्रदो
राजन्यस्तु नृणां वलीपलितजिन्मृत्युं जयेदञ्जसा ।
दद्याकर्षणसिद्धिदस्तु सुतरां वैश्योऽथ शूद्रो भवेत्
सर्व्वव्याधिहरस्तदेव कथितो वज्रस्य वर्णो गुणः ॥"
इति राजनिर्घण्टः ॥ * ॥

अपि च ।

अथ वज्रस्य नामलक्षणगुणाः ।

"हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः ।
स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्त्रियो मतः ।
पीतो वैश्योऽसितः शूद्रश्चतुर्व्वर्णात्मकश्च सः ॥
रसायने मतो विप्रः सर्व्वसिद्धिप्रदायकः ।
क्षत्त्रियो व्याधिविध्वंसी जरामृत्युहरः परः ॥
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ।
शूद्रो नाशयति व्याधीन् वयस्तम्भं करोति च ।
पुंस्त्रीनपुंसकाश्चैते लक्षणीयानि लक्षणैः ॥
सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥
रेखाबिन्दुसमायुक्ताः षड्स्रास्ते स्त्रियः स्मृताः ॥"
षड्स्राः षट्कोणाः ।
"त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया नपुंसकाः ॥
तेऽपि स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ।
स्त्रियः कुर्व्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ॥
नपुंसकास्त्ववीर्य्याः स्युरकामाः सत्त्ववर्ज्जिताः ।
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत् ।
सर्व्वेभ्यः सर्व्वदा देयाः पुरुषा वीर्य्यवर्द्धनाः ॥
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुतां पङ्गुलत्वञ्च तस्मात् संशोध्य मारयेत् ॥"
मारितस्य वज्रस्य गुणाः ।
"आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च ।
सेवितं सर्व्वरोगघ्नं मृतं वज्रं न संशयः ॥"
इति भावप्रकाशः ॥

(अथ वज्रमारणम् ।

"त्रिवर्षारूढ़कार्पासमूलमादाय पेषयेत् ।
त्रिवर्षनागवल्ल्यास्तु निजद्रावैः प्रपेषयेत् ॥
तद्गोलके क्षिपेद्वज्रं रुद्ध्वा गजपुटे पचेत् ।
एवं सप्तपुटेनैव म्रियते कुलिशं ध्रुवम् ॥"
मतान्तरम् ।
"कांस्यपात्रे तु भेकस्य मूत्रे वज्रन्तु निःक्षिपेत् ।
त्रिःसप्तकृत्वः सन्तप्तं वज्रमेवं मृतं भवेत् ॥"
अथान्यः ।
"त्रिःसप्तकृत्वः सन्तप्तं खरमूत्रेण सेचयेत् ।
मत्कुणैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत् ॥
प्रध्मातं वाजिमूत्रेण सिक्तं पूर्व्वक्रमेण तु ।
भस्मी भवति तद्वज्रं वज्रवत् कुरुते तनुम् ॥
आयुष्यं सौख्यजननं बलरूपप्रदन्तथा ।
रोगघ्नं मृत्युहरणं वज्रभस्म भवत्यलम् ॥"
इति वज्रमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥ * ॥ ) अन्यच्च । अथ वज्रगणना । विष्णुधर्म्मोत्तरे ।

"वज्रं मरकतञ्चैव पद्मरागञ्च मौक्तिकम् ।
इन्द्रनीलं महानीलं वैदूर्य्यं गन्धसंज्ञकम् ॥
चन्द्रकान्तं सूर्य्यकान्तं स्फाटिकं वलकं तथा ।
कर्केतरं पुष्परागं तथा ज्योतीरसं द्विज ॥
स्फाटिकं राजवर्त्तञ्च तथा राजमतं शुभम् ।
सौगन्धिकं तथा गञ्जं शङ्खब्रह्ममयं तथा ॥
गोमेदं रुधिराख्यञ्च तथा भल्लातकं द्विज ।
धूलीमरकतञ्चैव तुत्थकं सीसमेव च ॥